श्रीःगुरुभ्यो नमः महागणपतये नमः

# ।। श्रीमद्मत्स्यमहापुराणम् ।।

**अनुवादकः - डा.माधव पाण्डुरङ्गी**

## प्रथमाध्यायः

**मत्स्यरूपिणा हरिणा उपदेशः —**

पद्मादिपुराणवत् इदं मत्स्यपुराणं नैमिषारण्ये सूत-शौनकसंवादरूपमस्ति । मनुप्रजापतिः पुत्रेषु राज्यधुरां निक्षिप्य तपसे मलयप्रदेशं गतः । दशलक्षतपश्चरणेन सन्तुष्टो भगवान् 'प्रळयकाले समस्तजगद्रक्षको भव' इति वरं प्रदत्तवान् । यदा स मनुः पितृणां तर्पणाय उद्युक्तः तदा (शफरीमेकं) मीनमेकं अपश्यत् । दिने दिने सा प्रवर्धमाना वासस्थलं नापश्यत् । तदायं मनुः अयं विष्णुरेव भवेत् इति निश्चित्य अस्तौत् । ततश्च भगवान् 'सद्य एव प्रळयः भविष्यति । ततः सर्वे देवताः समेत्य नौकां सज्जीकुर्वन्ति, चतुर्विधजीवसङ्घान् अनया नौकया रक्ष । नौकामिमां मम शृङ्गे नियोजय, लयान्ते त्वं जगतः प्रजापतिः भविष्यसि' इति वरं प्रदत्तवान् ।

## द्वितीयोऽध्यायः

**प्रळयवर्णनं जगत्सृष्टिश्च —** विष्णुः मनोः प्रळयस्य तथा सृष्टेश्च वर्णनं एवमकरोत् । इतः आरभ्य शतवर्षेषु प्रळयो भविष्यति । तदा सूर्यः रक्तवर्णः सन् भूतानां सत्वनाशको भविष्यति । वाडवानलः उज्वलस्सन् क्रूरो भविष्यति । पाताळलोकात् विषाग्निः उद्भविष्यति । ईश्वरस्य तृतीयनयनोत्थिताग्निः लोकान् दहति । पृथ्वीयं भस्मीभूता भवति । एवं जगति नष्टे विष्णुना पुनः आदौ तेजसः (वीर्यात्) अण्डं अजायत । तत्र ब्रह्माण्डे पृथिव्यादिलोकानां सृष्टिः, लवणादिसप्तसमुद्राणां, ग्रहनक्षत्राणां जीविनां च जनिः ।

(पदार्थानुक्रमणिका - शरीरं - इन्द्रियाणि-पञ्चतन्मात्राणि श्रयन्ति अत्र इति शरीरम्- श्रयन्ति यस्मात्तस्मात्ताः शरीरं तेन संस्कृतम् -म.पु.३.२२)

**अध्याय - ३**

**ब्रह्मणा वेदादीनां सृष्टिः —** ब्रह्म शतकोटिविस्तरं वाङ्मयं सस्मार । चतुरः वेदान् मीमांसां अन्यानि शास्त्राणि च अपठत् । ब्रह्मणः मनसः मरीच्यत्र्यादयः दशपुत्राः जज्ञिरे । ब्रह्मणः अङ्गेभ्यः दक्षादि नवपुत्राः 'अङ्गजा' नाम्नी पुत्री च प्रादुरभूवन् ।

ततश्च प्रकृतेः सत्व-रजस् तमोगुणानां सृष्टिः, गुणेभ्यः महत्तत्वं, महत्तत्वात् अहङ्कारं, ज्ञानकर्मेन्द्रियाणां, रूप-रस-गन्ध-स्पर्श-शब्दानां च सृष्टिः जाता । तदनन्तरं ब्रह्मा स्वशरीरात् शतरूपां ससर्ज । रूपवतीं तां दृष्ट्वा मोहितस्य ब्रह्मणः पूर्वादिदिक्षु मुखानि अजायन्त । शिरसः ऊर्ध्वदेशेऽपि यदा मुखमेकं आविरभूत्, तदा ब्रह्मा स्वजटाभिः तं मुखं रुद्धमकरोत् । तथा ब्रह्मा चतुर्दश मनून् उत्पादयामास । मत्स्यमूर्तिना श्रवणरतः मनुः एषु सप्तमः ।

ब्रह्मणः चतुर्मुखत्वप्रसङ्गः — पुत्र्याः अवलोकने लज्जितस्य ब्रह्मणः दक्षिणे पाण्डुगण्डवत् मुखं आविर्भूतम् । विस्मयेन स्फुरदोष्ठे पृष्ठभागे एकं मुखं उदगात् । ब्रह्मणि कामवशे वामे मुखमेकं अभूत् ।

**नामानुक्रमणिका -**

ब्रह्मणः मानसपुत्राः - मरीचिः अत्रि - अङ्गीरसः पुलस्त्यः पुलहः - क्रतुः - प्रचेतसः - वसिष्ठः - भृगुः नारदः ।

ब्रह्मणः शारीरपुत्राः विविधाङ्गजाताः

दक्षप्रजापतिः - दक्षिणाङ्गुष्ठतः

धर्मः - स्तनात्

मन्मथः - हृदयतः

क्रोधः - भ्रुवोर्मध्यात्

लोभः - ओष्ठम्

मोहः - बुद्धेः

मनः - अहङ्कारात्

सन्तोषः - कण्ठात्

मृत्युः - नेत्रात्

भरतः करमध्यात् (म.पु.३.९-११)

ब्रह्मणः शतरूपायां स्वायम्भुवः स्वारोचिषः औत्तमः इत्यादयः १४ पुत्राः अजायन्त ।

साङ्ख्यशास्त्रम् - शास्त्रेऽस्मिन् षड्विंशतितत्वानि अङ्गीकृतानि सन्ति, कपिलादिमुनयः तत्वानि सङ्ख्यारूपेण व्यपदिशन् इत्यतः अस्य सङ्ख्याशास्त्रत्वम् । तानि च-

**कल्पवर्णनम्** - अध्यायेऽस्मिन् कल्पानां वर्णनम्, तत्प्रभेदः, तत्तत्कल्पे ब्रह्मोक्तपुराणानि, तत्प्रभेदाः इत्यादि वर्णितानि । कल्पं ब्रह्मणः दिनमेकं भवति ।

कल्पानि च

१. श्वेत २. नीललोहित ३. वामदेव ४. रथान्तर ५. रौरव ६. देव ७. बृहत्कला ८. कन्दर्प ९. सद्य १०. ईशान ११. तमः १२. सारस्वत १३. उदान १४. गारुड १५. कौर्म १६. नारसिंह १७, समान १८. आग्नेय १९. सोम २०. मानस २१. तत्पुरुष २२. वैकुण्ठ २३. लक्ष्मी २४. सावित्री २५. घोर २६. वाराह २७. वैराज २८. गौरीकल्प ३०. पितृकल्प

एतत्त्रिंशत्कल्पावसाने ब्रह्मणः दिनमेकं भवति । कल्पान्येतानि सङ्कीर्ण-तामस-राजस-सान्विकेति चतुर्विधानि । ब्रह्मा च पुरा यत्कल्पे ब्रह्मणा यत्पुराणं प्रोक्तं तत् पुराणं तत्विषयं विशेषतः वक्ति । सात्विकपुराणेषु च विष्णुश्च विशषतो प्रतिपाद्यते ।

सङ्कीर्णकल्पेषु- सरस्वतीपित्रोः विशेषतो वर्णनं भवति । तामसकल्पेषु -अग्नि-शिव-सूर्याणां विशेषतो वर्णनम् । तामसकल्पेषु - अग्नि-शिव-सूर्याणां विशेषतो वर्णनम् । राजसकल्पेषु ब्रह्मणः विशेषवर्णनं भवति । एतद् विषयप्रतिपादकपुराणदानं कल्पदानमित्युच्यते ।

ब्रह्मणः शतवर्षाणि शिवस्य दिनमेकम् । शिवस्य शतवर्षाणि विष्णोः निमेषमेकं भवति ।

एतत् सर्वं मत्स्यमूर्तिः मनवे वर्णयित्वा अदृश्यो अभूत् । ततश्च वैवस्वतमनुः नानाविधाः प्रजाः सृष्ट्वा पर्यपालयत् ।

**अध्याय - २९१**

**पुराणविषयाणि** - अध्यायेऽस्मिन् अखण्डपुराणोक्तविषयाणि निरूपितानि विषयाण्येव सन्ति-

१. ब्रह्माण्डोत्पत्तिः २. चतुर्विंशतितत्वसृष्टिः ३. देवासुरोप्तत्तिः ४. व्रतानि ५. मन्तरवर्णनम् ६. बुध-इलासमागमः ७. पितृवंशवर्णनम् ८. श्राद्धविचारः ९. तीर्थयात्रा १०. चन्द्रवंशः ११. पुरुवंशः १२. अग्निवंशः १३. कर्मयोगः १४. नक्षत्र -पुरुषप्रभृतिव्रतानि १५. आहारपदार्थानां दानम् १६. भूगोळवर्णनम् १७. त्रिपुरासुरसंहारः १८. तारकवृत्तान्तः १९. गोत्र-प्रवराः २०. गोदानम् २१. सावित्री उपाख्यानम् २२. राजधर्मः २३. शुभाशुभशकुनानि २४. स्वप्नफलवर्णनम् २५. वामनः २६. वराहः २७. क्षीरसमुद्रमथनम् २८. कालकूटपानम् २९. देवासुरसङ्ग्रामः ३०. वास्तुशास्त्रं ३१. प्रतिमालक्षणम् ३२. देवताराधनम् ३३. देवालयलक्षणम् ३४. मण्टपलक्षणम्

३५. भविष्यत्राजानः ३६. तुलापुरुषादिदानम्

अतिपुण्यप्रदं पुराणम् मात्स्यम् - शृण्वन् पठन् अश्वमेधफलं अवाप्नोति ।

अध्यायः - २९२

**पुराणश्रोतृधर्माः** - अध्यायेऽस्मिन् पुराणश्रवणनियमाश्च निरूपिताः । नियमाः च एवं वर्तन्ते ।

१. भक्त्या श्रवणं कार्यम् ।

२. श्रवणमध्ये न गच्छेत् ।

३. गन्धाधीन् समर्प्य शृणुयात् ।

४. श्रवणमध्ये नोत्तिष्ठत् ।

५. सोष्णीशमस्तकाः ताम्बूलं भक्षयन्तः तुङ्गासनारूढाः डाम्भिकाः, वरासनारूढाः सन्तः पुराणं न श्रृणुयुः । पुराणवाचकेभ्यः योग्यदानानि समर्प्य पुराणश्रवणार्थं समग्रानुकूल्यं कृत्वा भाग्यशाली भवेत् ।

समाप्तम्

*****

**अनुवादकः - डा.माधव पाण्डुरङ्गी**